सरलीकृत

वेदोक्त गृहवास्तु शान्ति प्रयोग

इशान

४६ चरकी

पूर्व

५० स्कन्द

५४ इन्द्र

आग्नेय

४७ विदारिका

५५ अग्नि

उत्तर

६० कुवेर

५३ पिलपिच्छ

दक्षिण

५१ अर्यमण

५६ यम

४६ पापराक्षसी

५९ वायु

वायव्य

५२ जृम्भक

५८ वरुण

पश्चिम

४८ पूतना

५७ निर्ऋति

नैर्ऋत्य

- मधुसूदन सुवेदी

सरलीकृत

वेदोक्त गृहवास्तु शान्ति प्रयोग

मधुसूदन सुवेदी

सानेपा, ललितपुर

२०७२

सुवेदी प्रकाशन माला — एक चालीसौं

लेखकः मधुसूदन सुवेदी,
सानेपा, ललितपुर,
फोन नं ५५२५७९५,
मोवाइल नं ९८४१४१४९७२
ई–मेल : msubedi06@yahoo.com
Visit: mssubedi.wordpress.com

प्रकाशक : श्रीमती सानुमैयाँ, वैकुण्ठ
तथा दामोदर सुवेदी
सानेपा, ललितपुर ।

सर्वाधिकार : © लेखकमा सुरक्षित

प्रथम संस्करण : १००१ प्रति
दोस्रो संस्करण : २००१ प्रति
तेस्रो संस्करण : १००१ प्रति
प्रकाशन मिति : २०७२ जेष्ठ
सहयोग मूल्य : रू. १००/–

मुद्रक : परिचित छापाखाना
बालाजु, काठमाडौ,
फोन नं. ४३६५१०१

दुई शब्द

हिन्दू भई जन्मनु केवल संयोगमात्र होइन, पूर्वजन्मको संस्कार र भगवान्‌को विशेष अनुकम्पा पनि हो। जन्मनु, मर्नु पनि भगवान्‌कै इच्छा अनुसार हुने हो। सृष्टि, संभार र संहार गर्ने र यस क्रमलाई निरन्तरता दिने अदृश्य एवं अद्वैत शक्तिको नाम नै भगवान् हो।

वैदिक सनातन धर्मका विषयमा केही गर्न र गराउन समेत मेरो उत्कट इच्छा रहँदै आएको छ । यो विश्वमा जति वस्तुहरू छन् ती सबै कर्तव्य वा कर्मको अधीन छन् र कर्मपूरा गर्नको लागि अनवरत रूपले चली रहन्छन्। यो विश्व केवल कर्मक्षेत्र हो। जहाँ–जहाँ हेरौं त्यहाँ केही न केही गरिरहनको लागि नै आबाज आउँदछ।

यो आदर्श कर्मभूमिमा केही न केही सुकर्म गर्दै जानु पर्दछ भन्ने मेरा परम पूजनीय स्वर्गीय पिता पं. रमानाथ सुवेदीज्यूको प्रेरणा अनुसार २०४२ सालको नववर्षको शुभकामनाको रूपमा "हिन्दू सदाचार पद्धति" नामक पुस्तिका तयार पारी वितरण गरिएकोमा विभिन्न जिज्ञासु पाठकबृन्दबाट यो सुझाव प्राप्त भयो कि "कर्मकाण्ड" गर्ने ब्राह्मणहरू नगण्य मात्रामा पाउन थालिएको अनुभव हुन लागेकोले यसको जगेर्ना गर्ने

खालको प्रारम्भिक कुराहरू पनि देखाइएको भए थोरै पठन-पाठन गरेका व्यक्तिहरू तथा सानातिना बच्चाहरूले पनि यसलाई अवलम्बन गरी सदाचारलाई लोप हुनबाट बचाई पुनर्जागरणको सूत्रपात हुन्थ्यो होला भन्ने सद्भावना व्यक्त हुन आएकोले मलाई पनि यो प्रेरणा सामयिक लाग्यो। जसरी संस्कृति तथा शिक्षा बचाउन संस्कृति मन्त्रालय र शिक्षा मन्त्रालय अविरल प्रयासमा तल्लीन रहेका छन् त्यस्तै संस्कृति अन्तर्गत यो "सनातन वैदिक धर्म" भित्र पर्ने भएकोले सो जोगाउने सम्पूर्ण धर्मावलम्बीहरूको कर्तव्य हो तापनि केही हदसम्म ममा पनि ठूलो जिम्मेवारी छ भन्ने संझी यस भन्दा पहिले मैले यहाँ उल्लेखित पुस्तकहरू- १. हिन्दू सदाचार पद्धति, २. दुर्गापूजाविधिः, ३. सरलीकृत लक्ष्मीपूजाविधिः, ४. सरलीकृत महालक्ष्मीपूजाविधिः, ५. सरलीकृत सत्यनारायण पूजाविधिः, ६. सरलीकृत अन्त्यपद्धति, ७. सरलीकृत मार्कण्डेयाद्यष्टचिरञ्जीवी पूजाविधिः, ८. सरलीकृत ग्रहशान्त्यग्निस्थापन-चूडोपनयन-वेदारम्भ-समावर्तनविधिः, ९.सरलीकृत स्वयम्वर-पूर्वाङ्ग - ग्रहशान्ति-पटलाञ्छनसहित विवाह विधिः, १०. सरलीकृत श्रीगणेश सहस्रनामपूजाविधिः, ११. सरलीकृत हरितालिका र ऋषिपञ्चमी पूजाविधिः, १२. सम्पूर्ण एकादशीमाहात्म्य, १३. सरलीकृत

अग्निस्थापनाविधिः, १४. सरलीकृत शिलान्यासविधिः, १५. सरलीकृत तर्पणैकोद्दिष्टपार्वणैकपार्वणतीर्थश्राद्ध विधिः, १६. सनातन विशेष चाडपर्व तथा धार्मिक लेख, १७. सनातन दैनिकपूजाविधि तथा वार्षिकपर्व निर्देशिका, १८. सनातन हिन्दूधर्म तथा संस्कार, १९. श्रीपशुपतिनाथ र प्रसिद्ध शिवलिङ्गहरू तथा द्वादशज्योतिर्लिङ्ग, २०. सरलीकृत रुद्राष्टाध्यायी शिवपूजाविधि २१. तीर्थयात्रा संस्मरण (चारधाम बाह्र ज्योतिर्लिङ्ग तथा कैलाश मानसरोवर आदि यात्रा विवरण) २२. सरलीकृत श्री पूर्णिमाव्रत चन्द्रमा पूजाविधिः २३. श्रीकालीका तथा दुर्गा उपासना विधिः २८. सरलीकृत चतुरशीति सिद्धपूजाविधिः २९. सरलीकृत मासिक श्राद्धविधिः ३०. सचित्र स्वस्थानि व्रतकथा पूजाविधिः ३१. सरलीकृत मूल शान्तिविधिः ३२. सरलीकृत वैभव लक्ष्मी पूजाविधि व्रतकथा ३३. सरलीकृत कालसर्पयोग शान्ति विधिः ३४. सरलीकृत ग्रहशान्ति कर्मप्रयोग विधिः सहित विभिन्न विषयका पुस्तकहरू जम्मा चालीस प्रकाशमा ल्याईसकेको छु।

धर्मशास्त्रको उद्देश्य मुख्य रूपमा मानव आचरणलाई नियमित र नियन्त्रित गर्नमा निहित रहेको पाइन्छ। हरेक मानिसको अन्तिम उद्देश्य मोक्ष प्राप्त गर्नु हो । मोक्ष

प्राप्त गर्नका लागि धर्मशास्त्रले कर्तव्य तोकेका छन्। धर्म शब्दले असल कुरा धारण गर्नु वा कुनै कर्तव्य गर्नु भन्ने कुरा जनाउँछ। तसर्थ हिन्दू दर्शनमा धर्मको स्थान सर्वोपरि र व्यापक छ। कर्म गरेमात्र मोक्ष प्राप्त हुन्छ। किनभने यो जीवनको एकमात्र उद्देश्य विश्वव्यापी साक्षात् सच्चिदानन्द प्रभुको प्राप्ति मात्रको हो उनको अवलम्बन र उनको स्मरण मुक्ति मार्ग पार गर्ने पुल हो। यस संसारमा निवास गर्ने व्यक्तिको यही मुख्य काम गर्ने विषय हो।

यस संसारमा भगवान्को यही विधान छ कि "अहम्" भावलाई तुच्छ सम्झिनु पर्दछ। महात्मा विदुरले पनि महाभारतमा यहि "पूर्ण अहम्" को केन्द्र बनाई भन्नु भएको हो। जति सुकै राम्रो भएता पनि "परधर्मो भयावह" हुन जानेछ। आज-भोलि कलियुगको प्रभावले गर्दा मानवजातिले आ-आफ्ना धर्म र सदाचार छोडी धर्मलाई केवल जीविकाको साधन बनाएको कतै पाइन्छ भने कतै स्वधर्मलाई स्वार्थवस त्यागेको पनि पाईन्छ यसो गर्नाले मानवजातिको क्षणिक कल्याण देखिए तापनि अन्त्यमा कल्याण हुन सक्दैन।

कसैले नयाँ घर निर्माण गरेपछि गृहवास्तु शान्ति गर्नु पर्ने हुँदा सो गर्न गराउन थोरै पढेका आफू र ब्राह्मणका केटाहरूले पनि सजिलै संग कार्य गर्न गराउन सकुन् भन्न

हेतुले सरलीकृत वेदोक्त गृहवास्तु शान्ति प्रयोग प्रकाशमा ल्याउन कोसिस गरेको हुँ।

साथै सबै पाठक वृन्दहरूमा यो सानो अनुरोध गर्दछु कि हाम्रो प्रयासलाई सहयोगका साथै उचित सर–सल्लाह दिई मद्दत समेत पुऱ्याई दिनु हुनेनै छ, कही त्रुटि भए सो अर्को संस्करणमा सच्याउन सुझाब समेतको आशा गर्दछु। यो पुस्तक तयार गर्न सरसल्लाह सुझाव तथा आकार प्रकारलाई सुहाउँदो रूपमा मिलाई छाँट्काँट र पुस्तकको रूप दिन विशेष व्यवस्था समेत गरी सहयोग पुऱ्याउनुहुने मेरा प्रिय भानिज द्वय पं. श्री जैमिनी घिमिरे, श्रीधर घिमिरेज्यूमा हार्दिक कृतज्ञता प्रकट गर्दछु। साथै यस पुस्तकको पाण्डुलिपि आद्योपान्त हेरी थपथाप गरी दिनुहुने आदरणीय पं. श्री वैजनाथ आचार्यज्यूमा आभार प्रकट गर्दछु।

यो पुस्तक प्रकाशन गर्न सहयोग गर्ने मेरी श्रीमती सानुमैया सुवेदी र सुपुत्र द्वय श्री वैकुण्ठ सुवेदी तथा श्री दामोदर सुवेदी समेतलाई दिलैदेखि धन्यवाद दिन चाहन्छु । यो पुस्तक प्रकाशन गर्न सहयोग गर्नु हुने श्री कान्छा श्रेष्ठज्यू तथा प्रेस प्राविधिक कर्मचारीहरूलाई समेत धन्यवाद दिन चाहन्छु। यसमा थपघट गर्नुपर्ने देखिए सो सुझाबको लागि विद्वत् बृन्दमा सादर अनुरोध गर्दछु।

मधुसूदन सुवेदी

विषयसूचि

विषयः		पृष्ठ
१.	अथवास्तुमण्डल सरङ्गकारिका मन्त्रः	१
२.	कर्मपात्र निर्माण	५
३.	प्रायश्चित्त गोदान	८
४.	बाहिर ढोकामा पूजा	१२
५.	वरण सङ्कल्प	१३
६.	पञ्चगव्य बनाउने	१७
७.	वास्तु वेदी बनाउने पूजा गर्ने	२०
८.	वास्तु मण्डप चक्र र सबैको पूजा	२३
९.	चतुःषष्ठीपछि ग्रह हवन	५२
१०.	फलामको किला गाड्ने	६७
११.	ततो बलिप्रकार पायस बलिदिने	८३
१२.	घरको बीचमा वास्तुकलश गाड्ने	८७
१३.	आवश्यक सामाग्री	९७

अथवास्तुमण्डल सरङ्गकारिका मन्त्रः

शिखीचैकपदोरक्तः तमीशानेति मन्त्रतः ॥
तथापीतश्च पर्जन्यः शन्नो वातेतिमन्त्रतः ॥१॥
जयन्तोद्विपदः पीतो मर्म्माणि इति मन्त्रतः ॥
पीतवर्णो भवेत्तस्य द्विपदः कुलिशायुधः ॥२॥
महाइन्द्रेतिमन्त्रेण पूज्यः कोष्ठे चतुर्थके ॥
सूर्य्योऽपिद्विपदोरक्तः वण्महाँ इति मन्त्रतः ॥३॥
सत्यं च द्विपदः श्वेतो व्रतेनेत्यादि मन्त्रतः ॥
भृशश्च द्विपदः कृष्णो भद्रं कर्णेभिरित्यतः ॥४॥
पदैकमन्तरिक्षन्तु कथितं कृष्णवर्णकम् ॥
यावाङ्कशेति मन्त्रेण पूज्यः कोष्ठाष्टके तथा ॥५॥
वायोरेकपदोधूम्रः वायोजेतेतिमन्त्रतः ॥
पूषा चैकपदो रक्तः पूषन्तवेति मन्त्रतः ॥६॥
वितथो द्विपदः शुक्लस्तत्सूर्यस्येतिमन्त्रतः ॥
पदद्वये गृहक्षतं पीतवर्णस्तथैवच ॥७॥
अक्षन्नमीमदन्तेति मन्त्रेणनेन पूजयेत् ॥
यमोऽपि द्विपदः कृष्णो यमायत्वेति मन्त्रतः ॥८॥
गन्धर्वो द्विपदोरक्तो गन्धर्वस्त्वेति मन्त्रतः ॥
द्विपदो भृङ्गराजोऽपि कृष्णवर्णः प्रतिष्ठितः ॥९॥

सौरीबलाका शार्गेति पूजयेद्वै प्रयत्नतः ॥
मृगरेकपदः पीतो मृगो न भीम मन्त्रतः ॥१०॥
पितृगणश्चैकपदः रक्तवर्णः प्रकीर्तितः ॥
तस्यावाहनमन्त्रस्तु पितृभ्यश्चेति बुध्यताम् ॥११॥
दौवारिकश्चैकपदः रक्तवर्ण इतिश्रुतः ॥
मन्त्रं शृणुत विप्रेन्द्राः द्रविणोदाः पिपीषति ॥१२॥
सुग्रीवो द्विपदः शुक्लो नीलग्रीवेति मन्त्रतः ॥
पुष्पदन्तश्च द्विपदः रक्तवर्णः प्रतिष्ठितः ॥१३॥
नमो गणेभ्यो मन्त्रेणावाहनं कारयेद्बुधः ॥
द्विपदो वरुणः शुक्ल इमम्मेति च पूजयेत् ॥१४॥
असुरो द्विपदः पीतो येरूपाणीति मन्त्रतः ॥
शेषश्च द्विपदः कृष्णो याऽइषवो यामन्त्रतः ॥१५॥
पापश्चैकपदः पीत एतत्त इति मन्त्रतः ॥
रोगोऽप्येकपदो रक्तो द्राप अन्धेति पूजयेत् ॥१६॥
अहिर्बुध्न्यश्चैकपदो रक्तवर्ण इतिश्रुतः ॥
नमोऽस्तु सर्पेभ्य इति मन्त्रेणैव प्रपूजयेत् ॥१७॥
मुख्यश्चद्विपदोरक्तः, अवतत्येति मन्त्रतः ॥
भल्लाटं द्विपदं कृष्णं इमा रुद्राय मन्त्रतः ॥१८॥
सोमोऽपि द्विपदः शुक्लः सोममित्यादि मन्त्रतः ॥

सर्पोपि द्विपदः कृष्णो नमोऽस्तु सर्पेति मन्त्रतः ॥१९॥
अदितिं द्विपदः पीतः अदितिर्द्यौरिति मन्त्रतः ॥
दितिश्चैकपदः पीत इडऽएह्य दितेति च ॥२०॥
शिखीपदाऽधरैशान्ये अपः शुक्लः प्रकीर्तितः ॥
आपोऽअस्मानित्यनेन पूजनीयः प्रयत्नतः ॥२१॥
कोणैकपद आग्नेये सविता शुक्लरूपतः ॥
उपयाम गृहीतोऽसि मन्त्रेणानेन पूजयेत् ॥२२॥
कोणैकपद नैर्ऋत्ये जयश्श्वेतः प्रतिष्ठितः ॥
मर्माणीति च मन्त्रेण स्थाप्या पूज्या प्रयत्नतः ॥२३॥
कोणैकपदवायव्ये रुद्रो रक्तः प्रतिष्ठितः ॥
नमस्ते रुद्र मन्त्रेण स्थापनं पूजनं तथा ॥२४॥
अर्य्यमास्त्रिपदः पूर्वे कृष्णवर्ण उदाहृतः ॥
यदद्य सूरउदिते मन्त्रेणानेन पूजयेत् ॥
केणैकपद आग्नेये सविता रक्तवर्णकः ॥
विश्वनि देवसवितः मन्त्रेणानेन पूजयेत् ॥२६॥
याम्यांचैव विवस्वन्तं शुक्लवर्णं पदत्रयम् ॥
विवस्वन्नादि मन्त्रेण आवाह्य पूजयेत्ततः ॥२७॥
कोणैकपद नैर्ऋत्ये रक्तं च विबुधाधिपम् ॥
सबोधि सूरिर्मघवामन्त्रेणानेन पूजयेत् ॥२८॥

पश्चिमे त्रिपदं मित्रं शुक्लवर्णं प्रतिष्ठितम् ॥
तन्मित्रस्येति मन्त्रेण पूजां कुर्याद्विधानतः ॥२९॥
राजयक्ष्मा रक्तवर्णः अभिसगोत्राणि मन्त्रतः ॥
वायव्यैकपदे चैव पूजां कुर्याद्विधानतः ॥३०॥
उत्तरे त्रिपदो रक्तः पृथ्वीधर इतिस्मृतः ॥
स्योना पृथ्वीति मन्त्रेण पूजयेद्वै प्रयत्नतः ॥३१॥
इशानकोणैकपदे आपः शुक्ला इति स्मृतः ॥
आतेवत्सो च मन्त्रेण मूजां कुर्याद्विधानतः ॥३२॥
मध्येनवपदः ब्रह्मा पीतवर्णः सुशोभनः ॥
आब्रह्मन्निति मन्त्रेण पूजां कृर्याद्विधानतः ॥३३॥

इति वास्तुमण्डलकालिका समाप्ता ॥

कर्ता शुद्ध भई पूजा गर्ने स्थानमा बस्ने फूल अक्षता लिई आसन र पृथ्वीलाई छुने मन्त्र–

ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ।

तीनपटक आचमन गर्ने मन्त्र–

ॐ अच्युताय नमः स्वाहा । ॐ केशवाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा ।

हात धुने मन्त्र–

ॐ गोविन्दाय नमः स्वाहा ।

कर्मपात्र निर्माण

कर्मपात्र बनाउने विधि–

गृह प्रवेश गर्नुभन्दा पहिले कर्मपात्र बनाउने कर्मपात्र कुनै पनि कर्म गर्नु अगावै बनाउने पात्र हो यसको कारण के हो भने हाम्रो जीवन पञ्च महाभूतबाट बनेको छ। यसैले सूर्य, आगो, तामा, जल, हावा, तल पृथिवी माथि आकाश श्रद्धाको प्रतीक पूजा र जलहरूको समग्र शक्ति युक्त र कुशको पवित्रको संयोग गराई वेदका मन्त्र पढी अलौकिक शक्ति युक्त पात्र कर्मपात्र बनाउने परम्परा र ही आएको छ। कर्मपात्र बनाउँदा भए सुन, चाँदी नभए तामाको थाली हुनुपर्दछ।

कर्मपात्र राख्ने ठाउँमा फूल अक्षता लिई छुने मन्त्र–

ॐ स्योनापृथिवी नोभवानृक्षरानिवेशनी

यच्छानः शर्म्मसप्रथा। पात्राधारपृथिव्यै नमः।

अब तामाको पात्र वा यथोचित पात्र राखी कर्मपात्रमा कुशको टुक्रा र पवित्र हाल्दा भन्ने मन्त्र –

ॐ पवित्त्रेस्थो व्वैष्णव्यौ सवितुर्व्वः प्प्रसव ऽउत्पुना म्यच्छिद्रेण पवित्त्रेण सूर्य्यस्य रश्मिभिः।

तस्य ते पवित्त्रपते पवित्त्रपूतस्य यत्कामः पुने तच्छकेयम्॥

जल हाल्दा भन्ने मन्त्र–

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।

शँय्योरभिस्रवन्तु नः॥

जौ हाल्दा भन्ने मन्त्र–

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवेऽन्तरिक्षायत्वा पृथिव्यैत्वा शुन्धन्ताँल्लोका पितृषदनाः पितृषदनमसि।

तिल हाल्दा भन्नो मन्त्र–

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः।

प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् पृणाहि नः॥

चन्दन हाल्दा भन्ने मन्त्र–

ॐगन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम्।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

अक्षता हाल्दा भन्ने मन्त्र–

ॐअक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत।

अस्तोषत स्वभानवो विप्रानविष्ठया मतीयोजान्विन्द्र ते हरी॥

फूल हाल्दा भन्ने मन्त्र–

ॐ श्रीश्चते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णँन्निषाणामुम्म ऽइषाण सर्वलोकम्म ऽइषाण ॥

अब दाँया हात घोप्ये गरी बुढी औँला र साहिंली औँलाले चलाउने मन्त्र–

ॐ यद्देवा देवहेडनन्देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः ॥१॥
ॐ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः॥२॥
ॐ यदि जाग्रद्यदि स्वप्नऽएनाꣳसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः॥३॥

कर्मपात्रबाट तीन टुक्रा कुश लिई त्यसैका जलले वरिपरि र आफूलाई पनि मार्जन गर्दा भन्ने मन्त्र–

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यःस्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ॐ पुण्डरी काक्षः पुनातु ३, ॐ पुण्डरी काक्षाय नमः ३ ॥

पवित्र धारण गर्ने मन्त्र (औंठी लगाउने)–

ॐ पवित्त्रेस्थो व्वैष्णव्यौ सवितुर्व्वः प्रसव ऽउत्पुना म्यच्छिद्रेण पवित्त्रेण सूर्य्यस्य रश्मिभिः।

तस्य ते पवित्त्रपते पवित्त्रपूतस्य यत्कामः पुने तच्छकेयम्॥

गृह प्रवेश गर्नु भन्दा पहिले शरीर शुद्धिको निमित्त प्रायश्चित्त गोदान गर्न गाईको मूल्य कल्पना गरी बोहोतामा रूपैयाँ छुट्याउने र पूजा गर्ने मन्त्र–

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥

नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

ॐ इरावती धेनुमती हि भूतᳬ सुयवसिनी मनवे दशस्या व्यस्कब्भ्नारोदसी विष्णवे तेदाधर्थ पृथिवी मभितोमयूखैः स्वाहा॥ ॐ गवे नमः ३॥ ॐ गोप्रत्याम्नायीभूत प्रचलित व्यवहारिक द्रव्याय नमः॥

ब्राह्मणलाई टीका लगाइ दिने–ब्राह्मणले भन्ने मन्त्र–

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

गोदानमा रहेको कुशले त्यहींको जलले आफूलाई शेचन गर्ने र भन्ने–

ॐ मनो मे तर्पयत, वाचम्मे तर्पयत, प्राणम्मे तर्पयत, चक्षुर्म्मे तर्पयत, श्रोत्रम्मे तर्प्पयतात्मानंमे तर्पयत, प्रजाम्मे तर्पयत, पशुन्मे तर्प्पयत, गणान्मे तर्पयत, ॐगणामेमा वितृषन् ॥

तीन टुक्रा कुश र जौतिल पानी लिई बोहोतालाई छुने–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्य श्रीमद्भगवतो महापुराणपुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलियुगस्य प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गत ब्रह्मावर्तैकदेशे हिमवत्पर्वतैक नेपालाख्यदेशे गोरक्षराज्ये गङ्गादेव्याः उत्तरकोणे गण्डकी कौशिकीप्रदेशे श्रीमद्विष्णुप्रजापतिक्षेत्रे पशुपतेः, अमुकदिग्भागे वाग्मत्या अमुकदिग्भागे पाशुपतक्षेत्रे अमुकग्रामे, वा अमुकनगरे इह पुण्य भूमौ षष्टिसम्वत्सराणां मध्ये अमुकनाम संवत्सरे श्री सूर्ये उत्तरायणे वा दक्षिणायने अमुकऋतौ सौरेण

चान्द्रेण वा अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ अमुकराशिस्थिते चन्द्रमसि अन्येषु शेषेषु ग्रहेषु यथा यथा स्थानस्थितेषु सत्सु एवं अनेक ग्रहगणविशेषेण विशिष्टायां यथा लग्नकरणमुहूर्तान्वितायाम् शुभपुण्यतिथौ अद्येह अमुकगोत्रस्य अमुकप्रवरस्य, अमुकशाखान्तर्गतस्य, अमुकवेदाध्यायिनः, अमुकनाम्नः शर्मणः (वर्मणो, गुप्तस्य वा) मम इह जन्मनि जन्मान्तरे वा वास्तोः शुभतासिद्ध्यर्थं श्रुतिस्मृतिपुराणागमोक्तफलप्राप्तये सर्व पापक्षय पूर्वक दीर्घायुर्विपुल धानधान्य पुत्रपौत्रादि अनवाञ्छेय सन्ततिवृद्धि स्थिर लक्ष्मी कीर्तिलाभ अभिष्टसिद्ध्यर्थं अस्य वास्तोः शुभतासिद्ध्यर्थं सनवग्रहमखां वास्तुशान्ति पूजन कर्मसु अधिकारता सिद्धये कायिकवाचिकमानसिक सांसर्गिक ज्ञाताज्ञातस्पर्शास्पर्श आसनशयनादि सकलदोषनिवृत्तिपुरसरः इह पाञ्चभौतिकस्थूलदेहशुध्यर्थं इमां सकलप्रायश्चित्तिभूतां गां रुद्रदैवत्यां तत्प्रत्याम्नायीभूतप्रचलितव्यावहारिक द्रव्यं

वनस्पतिदैवतं गोत्राय शर्मणे सुपूजिताय ब्राह्मणाय प्रायश्चित्तंगोदानत्वेन द्रव्यदानं अहं संप्रददे। तत्सन्नमम।

फूल अक्षता लिएर गाईको प्रार्थना गर्ने–

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मात् तस्मात् शान्तिं प्रयच्छ मे॥
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥
या लक्ष्मीः सर्वभूतानां या च देवे प्रतिष्ठिता।
धेनू रूपेण सा देवी मम पापं व्यपोहतु॥

दान प्रतिष्ठा रूपैयाँलाई पूजा गर्ने–

ॐ स्वर्ण्णधर्म्मः स्वाहा। ॐ स्वर्ण्णार्क्कः स्वाहा। ॐ स्वर्ण्णज्ज्योतिः स्वाहा। ॐ स्वर्णशुक्रः स्वाहा। ॐ स्वर्ण्णसूर्य्यः स्वाहा॥ भनी पूजागर्ने।

कुशको टुक्रा लिई रूपैयाँलाई हातमा लिने–

अद्य कृतैतत् कृतस्य प्रायश्चित्तभूतगोदानद्रव्यदान कर्मणः प्रतिष्ठा साङ्गतासिध्यर्थं इमां दानप्रतिष्ठादक्षिणां रजतखण्डं चन्द्रदैवतं प्रचलितव्यावहारिकद्रव्यं वनस्पतिदैवतं पूर्वोक्तगोत्राय पूर्वोक्तशर्मणे ब्राह्मणाय प्रायश्चित्तगोदान

दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे। तत्सन्न मम। ॐ स्वस्ति प्रतिवचनम्। भनी लिने।

जलले प्रदक्षिणा गर्ने)–

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिणापदे पदे॥

अब गौदानलाई अलि परसारि नमस्कार गर्ने–

ॐ नमस्ते कपिले देवि संसारार्णवतारिणि।
द्विजेन्द्राय ददामि त्वां प्रसन्नो भव सर्वदा॥

ॐ कोऽदात् कस्माअदात् कामोऽदात् कामायादात् कामोदाता कामः प्रतिग्रहीता कामैतत्ते॥

अब ब्राह्मणले उक्त गोदानको जलले अभिषेक गर्ने–

ॐ द्यौ शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्बह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि॥

बाहिर ढोकामा पूजा

घर बाहिर ढोकामा दियो, कलश, गणेश, अर्घ स्थापना गरी पूजागर्ने। ज्योतिषले दिएको साइतमा गृहप्रवेश गर्दा गाई, ब्राह्मण, कन्याकेटी, अघिलगाई शङ्ख, घन्ट ध्वनी,

स्वस्तिवाचन गर्दै घर घुमेर यजमान सपत्नीक समेतले दियो, कलश, गणेश उठाएर भित्र प्रवेश गर्ने धूपौरोमा गोकुलधूप, सालधूप, अष्टसुगन्धधूप राखी चोठा–कोठामा धूपधार गर्ने र रायो सर्सियूँ पनि सँगसँगै छर्दैजाने। यजमान पत्नीले माथिदेखि तलसम्म अमरेसाको कुचोले बडारेर नयाँ नाग्लोमा उठाएर बाहिर फालिदिने। अग्निस्थापना अनुसार यज्ञ गर्ने ठाउमा दियो, कलश, गणेश राख्ने। ब्राह्मणद्वारा यज्ञ तयार गरी आवश्यक कार्य गर्ने। यज्ञमा यजमान समत्नीक शुद्ध आसनमा पूर्व फर्केर बस्ने र आचमन गर्ने।

कर्मपात्रको जलले आफू र वरिपरि सेचन गर्ने–

अपवित्र पवित्रो वा सर्वावस्थां गतोपि वा।

यःस्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरी काक्षः पुनातु ३, ॐ पुण्डरी काक्षाय नमः ३॥

अग्निस्थापनामा लेखिएका विधि अनुसार गर्दै जाने। चतुः स्वस्तिसम्म हवन गर्ने त्यसपछि अरू कर्महरू गर्दै जाने।

जल द्रव्य अक्षता कुश लिएर वरण सङ्कल्प लिने–

ॐ विष्णुः ३ अद्य श्रीमद्भगवतो महापुराणपुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे

वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलियुगस्य प्रथमचरणे जंम्बूद्वीपे बौद्धावतारे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गत नेपालाख्यदेशे गोरक्षराज्ये गङ्गादेव्याः उत्तरकोणे गण्डकी कौशिकीप्रदेशे श्रीमद्विष्णुप्रजापतिक्षेत्रे पाशुपतक्षेत्रे, वाग्मत्या अमुकदिग्भागे अमुकग्रामे, वा अमुकनगर इह पुण्य भूमौ षष्टिसम्वत्सराणां मध्ये अमुकनाम संवत्सरे श्री सूर्ये उत्तरायणे वा दक्षिणायने अमुकऋतौ सौरेण चान्द्रेण वा अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ अमुकराशिस्थिते चन्द्रमसि अन्येषु शेषेषु ग्रहेषु यथा यथा स्थानस्थितेषु सत्सु एवं अनेक ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अद्येह अमुकगोत्रस्य अमुकप्रवरस्य, अमुकशाखान्तर्गतस्य, अमुकवेदाध्यायिनः, अमुकनाम्नः शर्मा सपत्नीकोऽहं (वर्मणो, गुप्तस्य वा) मम श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अस्य नूतन गृहे पंचवाण वाधाजन्य दोष निवारण पूर्वक वास्तोः शुभतासिद्ध्यर्थं सनवग्रहमखां वास्तुशान्तिं करिष्ये। तदङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं

वसोर्द्धारापूजनं आयुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिवरणानि च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजन पूर्वकमत्रा ऽअमुककर्मणि कृताकृता वेक्षण रूप ब्रह्मकर्तुं तथा च ऽमुककर्मणि प्रतिदेवतानाम्मुखे साज्य भागान्त माहावनीय द्रव्ययज्ञ होम कर्मकर्तुं नानानामगोत्रान् नानानाम शर्मणो ब्राह्मणानेभिश्चन्दनपुष्पा क्षतताम्बूल पूगीफलवासो द्रव्या भरणादिभि र्गणपति ब्रह्महोत्राचार्यत्वेन जापकपाठकत्वेन च युष्मानहं वृणे पुण्याह वाचनार्थं च वृणे।

त्यसपछि रुद्राभिषेक पनि गर्दै जाने। ग्रहशान्तिको लागि ग्रहको विधि अनुसार पूजागर्ने।

रायो सर्सियूँ छर्ने मन्त्र–

ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यम्मेनिष्ट्यो यममात्त्यो, निजखानेदमहन्तं वलगमुत्किरामि यम्मेसजातोयमसजातो निजखानोत्कृव्यांकिरामि ॥ रक्षोहणोवोवलगहनः प्रोक्षामिवैष्णवान्रक्षोहणोवो वलगहनोऽ वनयामि वैष्णवान् रक्षोहणोवो

व्वलगहनो वस्तृणामिव्वैष्ण वान्नक्षोहणौवां व्वलगंहनाऽउपदधामि व्वैष्णवीरक्षोहणौवां व्वलगहनौपर्य्यूहामिव्वैष्णवी व्वैष्णवमसिव्वैष्णवास्थ ॥ रक्षसांभागो सिनिरस्त६ रक्षऽइदमह ई रक्षो भितिष्ठ्ठा मीदमह ६ रक्षो वबाधऽइदमह ६ रक्षोधमन्तमोनयामि। घृतेनद्द्यावापृथिवीप्प्रोर्ण्णुवाथां व्वायोव्वेस्तोकानामग्निराज्यस्यव्वेतु स्वाहा स्वाहा कृतेउद्ध्र्वनभम्मारुतंगच्छतम्॥ रक्षोहाव्विश्वचर्षणिर भियोनिमयोहते। द्राणेसधस्थ मासदता॥

अपसर्पन्तु ये भूता ये भूता भूमिमाश्रिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्।
सर्वेषामविरोधेन पूजाकर्म समारभे।
ॐ यदत्र संस्थिता भूताः स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं स्तत्र गच्छतु॥
भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः।
स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि भुवंत्विमाम्॥

भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन ।

ते सर्वेऽप्यपगच्छन्तु पूजाकर्म करोम्यहम् ॥ भनी पूर्व दिशातर्फ पनि छरिदिने ॥

भूमिलाई सुद्ध गर्ने–

ॐ देवाः आयान्तु यातुधानाः अपयान्तु विष्णोर्देवयजनं रक्षस्व ॥ भनी पानी छुने ।

पञ्चगव्य बनाउने

(पञ्चगव्य बनाउँदा आधा भाग गउँत, गोबर र दूध गरी तीन भाग, दुई भाग दही, एक भाग घिउ र एक भाग कुशको जल मिलाएर पञ्चगव्य हुन्छ)। तसर्थ यी चिजहरूमा गोमूत्र हाल्ने मन्त्र–

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

गोवर हाल्ने मन्त्र–

ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

दूध हाल्ने मन्त्र–

ॐ आप्यायश्व समेतु ते विश्वतः सोम वृष्णयम् ।
भवा वाजस्य सङ्गथे ॥

दही हाल्ने मन्त्र–

ॐ दधिक्राव्णो ऽअकारिषञ्जिष्णोरश्वस्य वाजिनः ।

सुरभि नो मुखाकरत्प्राणऽआयूँषि तारिषत् ॥

घिउ हाल्ने मन्त्र–

ॐ घृतम्मिमिक्षे घृतमस्ययोनि र्घृतेश्रितो घृतंवस्यधाम ।

अनुष्वधमावहमा दयस्व स्वाहा कृतं वृषभ वक्षिहव्यम् ॥

जरासहितको कम्तीमा सातओटा कुशको पवित्र हाल्ने मन्त्र–

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्वाहुभ्याम्पूष्णो हस्ताभ्याम् ।

अग्नयेजुष्टङ्गृह्णाम्यग्नीषोमाभ्याञ्जुष्टङ्गृह्णामि ॥

यी ऋचाहरूले पवित्र गराइएको पञ्चगव्यलाई तलको मन्त्रले चलाउनू–

ॐ आपो हिष्ठा मयोभुवस्ता नऽऊर्जे दधातन । महेरणाय चक्षसे ॥

तलको मन्त्रले मन्त्रणा गर्नु–

ॐ मानस्तोके तनये मानऽआयुषि मानो गोषुमानोऽअश्वेषु रीरिषः ।

मानो वीरान्रुद्रभामिनोऽवधीर्हविष्मन्तः सदमि त्वा हवामहे ॥

गायत्री मन्त्रले १० पटक अभिमन्त्रण गरी ब्राह्मणद्वारा पञ्चगव्य प्रासन गर्न दिने मन्त्र-

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके।

प्राशनात् पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥

भनी घरको चोटा-कोठामा छर्ने र आफूले पनि प्राशन गर्ने।

त्रिराचम्य प्राणानायम्य (तीनपटक आचमन गर्ने मन्त्र)—

ॐ अच्युताय नमः स्वाहा। ॐ केशवाय नमः स्वाहा। ॐ माधवाय नमः स्वाहा।

हात धुने मन्त्र—

ॐ गोविन्दाय नमः स्वाहा।

शिखा बन्धन गर्ने मन्त्र—

चिद्रूपिणि महामाये दिव्यतेजःसमन्विते।

तिष्ठ देवि शिखाबन्धे तेजोवृद्धिं कुरुष्व मे ॥

प्राणायम गर्ने मन्त्र—

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टि वर्द्धनम्

उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात्।

वेदी बनाउने

घरको बीचमा यजमानले चार हातको वेदी बनाउने । पूर्वमा र इशान दिशामा एकहात वरावरको दुईवटा वेदि बनाउने।

वास्तु गर्ने वेदिमा वस्त्रले ढाकिदिने। कुमकुम आदिले दश रेखा बनाउने। पहिलो रेखादेखि दशै रेखामा रेखा देवताको नामपिच्छे क्रमशः पूजागर्ने–

१. ॐ शान्तायै नमः। २. ॐ यशोवत्यै नमः।

३. ॐ कान्तायै नमः। ४. ॐ बिशालायै नमः।

५. ॐ प्राणवाहिन्यै नमः। ६. ॐ सत्यै नमः।

७. ॐ सुमत्यै नमः। ८. ॐ नन्दायै नमः।

९.ॐ सुभद्रायै नमः। १०. ॐ सुरथायै नमः।

फेरी क्रमशः पूजागर्ने–

१. ॐ हिरण्यायै नमः। २. ॐ सुव्रतायै नमः।

३. ॐ लक्ष्म्यै नमः। ४. ॐ विधृत्यै नमः।

५. ॐ विमलायै नमः। ६. ॐ प्रियायै नमः।

७. ॐ जयायै नमः। ८. ॐ ज्वालायै नमः।

९.ॐ विशोकायै नमः। १०. ॐ इडायै नमः।

भनी रेखा देवताको पूजागर्ने।

अग्नि कुण्डमा अग्निस्थापना विधि अनुसार अग्नि स्थापना गर्ने। कुण्डको माथिल्लो मेखलामा श्वेतवर्ण विष्णुको यो मन्त्रले पूजागर्ने–

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्।
समूढमस्यपा ँ सुरे स्वाहा। ॐ विष्णवे नमः।

मध्य मेखलामा रातो वर्णको ब्रह्माको यो मन्त्रले पूजागर्ने–

ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसी मतः सुरुचोव्वेन आवः । स बुध्न्याऽउपमाऽ अस्यविष्ठाः सतश्च जोनिमसमतश्चव्विवः । ॐ ब्रह्मणे नमः ।

तल्लो मेखलामा कृष्ण वर्णको रुद्रलाई यो मन्त्रले पूजागर्ने–

ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमः ।
बाहुभ्या मुतते नमः । ॐ रुद्राय नमः ।

अब रक्त वर्णको गौरीलाई यो मन्त्रले पूजागर्ने–

ॐ अम्बेऽअम्बिकेऽम्बालिके न मानयति कश्चन ।

सस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् । ॐ गौर्यै नमः ।

अग्निस्थापना अनुसार पञ्चभू संस्कार आदि गर्ने। कुश पानी लिने सङ्कल्प–

अस्मिन् सनवग्रहमखेवास्तुशान्तिकर्मणि

पञ्चपूसंस्कारपूर्वकमग्निस्थापनं करिष्ये।

भनी कुशलाई इशानतर्फ छाडिदिने।

अग्निलाई स्थापना गर्ने मन्त्र–

ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे।

देवाँऽआसादयादिह।

प्रधान दक्षिण वेदिमा वस्त्रले ढाकने ग्रहशान्ति अनुसार ग्रह स्थापना गर्ने। इशानमा रुद्रकलश स्थापना गरी कलश पूजाविधि अनुसार पूजागर्ने र रुद्राभिषेक गर्ने। यज्ञको उत्तरंतर्फ वास्तुमण्डलमा प्रतिमा फल राखी शिख्यादि देवतालाई आवाहन गर्ने। इशान् कोणमा वास्तुको शिरमा शिखीको रातो सामग्रीले पूजागर्ने।

अथ वास्तु पूजा– मम गृहे स्थिर प्राणप्रतिष्ठा करणार्थं साङ्गैतन्मडप निर्माण विधौ पुनः पुनः संस्कारे क्रियमाणे कृते च कृताकृत वास्तुविधान सञ्जातन्यूनातिरेकादिदोष निवृत्यर्थं यथोक्तफलावाप्तये यथामिलितो पचारै वास्त्वर्चनमहं करिष्ये॥

वास्तुमण्डप चक्र



इशान
४६ चरकी
पूर्व
५० स्कन्द
५४ इन्द्र
आग्नेय
४७ विदारिका
५५ अग्नि
१ रातो शिखि
३२ पहेलो दिती
२ पहेलो पर्जन्य
३१ पहेलो अदिती
३ पहेलो जयन्त
४ पहेलो कुलिशायुध
५ रातो सूर्य
६ सेतो सत्य
८ रातो आकाश
७ कालो भृप
९ ध्वासे वायु
१० रातो-पुषणे
उत्तर
६० कुवेर
५३ पिलपिच्छ
३० कालो सर्पा
सेतो आप
३७ कालो आर्यमन
११ सेतो वितथः
दक्षिण
५१ अर्यमण
५६ यम
२९ कालो सोम
४३ रातो पृथ्वीधर
४५ रातो वा पहेलो ब्रह्मा वास्तु पुरूप
३९ सेतो विवस्वान
१२ पहेलो गृहक्षत
२८ कालो भल्लाटक
१३ कालो यम
२७ रातो मुख्य
४१ सेतो मित्र
१४ सेतो गन्धर्व
२६ रातो अही
२५ रातो रोग
२३ कालो शोपः
२४ पहेलो पाप
२२ पहेलो असुर
२१ सेतो वरुण
२० रातो पुष्पदन्त
१९ सेतो सुग्रीव
१५ कालो भृङ्गराज
१८ रातो दौवारिक
१६ पहेलो मृग
१७ रातो पितर
४६ पापराक्षसी
५९ वायु
वायव्य
५२ जृम्भक
५८ वरुण
पश्चिम
४८ पूतना
५७ निर्ऋति
नैऋत्य

इशानीमारभ्य पूजयेत् (ईशानबाट आरम्भ गरेर प्रत्येकमा पूजा गर्ने)–

१. शिखिनमावाहयामि –

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियं जिन्व मवसे हूमहे व्वयम्। पूषानोजथा व्वेद साम सदवृधे र क्षिता पायुरदब्धः स्वस्तये। ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

ॐ भूर्भुवः स्वः शिखिन् इहागच्छ इहतिष्ठ यावत् मम पूजां करोमि तावत्त्वं सुस्थिराभव सुप्रशन्नाभव वरदाभव पाद्यम्, अर्घ्यम्, आचमनीयम्, पञ्चामृत स्नानम्, सुद्धोदक स्नानम्, इदं लेपनम् चन्दनम्, सिन्दूरम्, अक्षतान्, यवान् तिलान्, पुष्पाणि समर्पयामि ॐ भू शिखिने नमः रक्त (रातो)।

२. पर्ज्जन्यमावाहयामि -

ॐ शन्नोवातः पवताᳬशन्नस्तपतु सूर्ज्जः। शन्नः कनिक्रदद्देवः पर्ज्जन्योअभिवर्षतु । पर्जन्य इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू पर्जन्याय नमः पीत (पहेंलो)।

३. जयन्तमावाहयामि–

ॐ मर्म्माणि ते वर्म्मणाच्छादयामि सोमस्त्वा राजामृतेनानुवस्ताम् । उरोर्व्वरीयोव्वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु ।

ॐ भूर्भुवः स्वः जयन्त इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू जयन्ताय नमः पीत (पहेंलो)।

४. कुलिशायुधमावाहयामि-

ॐ महाँ२।।ऽइन्द्रो व्वज्रहस्तःषोडशी शर्म्म यच्छतु हन्तु पाप्मानं योस्मान्द्वेष्टि । उपयाम गृहीतोसिमहेन्द्रायत्वैषते जोनिर्महेन्द्रायत्वा॥ ॐ भूर्भुवः स्वः कुलिशायुध इहागच्छ इहतिष्ठ मम पूजां गृहाण ......ॐ भू कुलिशायुधाय नमः पीत (पहेंलो)।

५. सूर्य्यमावाहयामि–

ॐ बण्महाँ२।।ऽअसि सूर्य्य बडादित्य महाँ२।।ऽअसि । महस्ते सतो महिमापनस्य तेद्धादेवमहाँ२।।ऽअसि ॥ सूर्य इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू सूर्य्याय नमः रक्त (रातो)।

६. सत्यमावाहयामि–

ॐ व्रतेन दीक्षा माप्नोतिदीक्षयाप्नोतिदक्षिणाम् दक्षिणा श्रद्धामाप्नोतिश्रद्धया सत्यमाप्यते। ॐ भूर्भुवः

स्वः सत्य इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू सत्याय नमः शुक्ल (सेतो)।

७. भृशमावाहयामि–

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाᳬँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥

ॐ भूर्भुवः स्वः भृश इहागच्छ इहतिष्ठ मम पूजां गृहाण .....ॐ भू भृशाय नमः कृष्ण (कालो)।

८. आकाशम् मावाहयामि–

ॐ यावाङ्कशामधुमत्यश्विना सूनृतावती। तयायज्ञं मिमिक्षतम्॥

ॐ भूर्भुवः स्वः आकाश इहागच्छ इहतिष्ठ मम पूजां गृहाण ......ॐ भूआकाशाय नमः शुक्ल (सेतो)॥

९. वायो मावाहयामि–

ॐ आनोनियुद्भिः शतिनीभिरध्वर ᳬ सदृस्रिणीभिरुपयाहियज्ञम्। व्वायोऽअस्मिन्त्सवने मादयस्व यूयं पातु स्वस्तिभिः सदानः॥

ॐ भूर्भुवः स्वः वायो इहागच्छ इहतिष्ठ मम पूजां गृहाण .....ॐ भू वायवे नमः धूम्र (ध्वासे)।

१०. पूषाणमावाहयामि–

ॐ पूषन्तव वते व्वयं नरिष्येम कदाचंन। स्तोतारस्तऽ इहस्पसि॥ पुषन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ पुष्णे नमः रक्त (रातो)।

११. वितथमावाहयामि–

ॐ तत्सूर्य्यस्य देवत्वन्त न्महित्त्वम्मद्धया कर्तो र्व्विततꣳ सञ्जभ़ार। यदेद युक्त हरितः सधस्था दाद्रात्री वासस्तनुते सिमस्मै॥

ॐ भूर्भुवः स्वः वितथ इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू वितथाय नमः शुक्ल (सेतो)।

१२. गृहक्षतमावाहयामि–

ॐ अक्षन्नमी मदन्त ह्यव प्प्रियाऽअधूषत। अस्तोषत स्वभानवो व्विप्रान्नविष्ठया मंती यो यान्विन्द्रते हरी॥

ॐ भूर्भुवः स्वः गृहक्षत इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू गृहक्षताय नमः पीत (पहेंलो)।

१३. यमम्मावाहयामि–

ॐ यमायत्वा मखायत्वा सूर्य्यस्यत्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳस्पृशस्पाहि। अर्चिरसि शोचिरसि तपोसि॥

ॐ भूर्भुवः स्वः यम इहागच्छ इहतिष्ठ मम पूजां गृहाण ......ॐ भू यमाय नमः कृष्ण (कालो)।

१४. गन्धर्वमावाहयामि–

ॐ गन्धर्वस्त्वा ब्विश्वावसुः परदधातु ब्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्नि रिड्ऽईडितः। मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्म्मणा ब्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड्ऽईडितः॥

ॐ भूर्भुवः स्वः गन्धर्व इहागच्छ इहतिष्ठ मम पूजां गृहाण ..... ॐ भू गन्धर्वाय नमः रक्त (रातो)।

१५. भृङ्गराजंमावाहयामि–

ॐ सौरी वलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्व विद्धौमी शार्दूलो वृकः पृदाकुस्त मन्न्यवे सरस्वते शुकः पुरुषवाक्।

ॐ भूर्भुवः स्वः भृङ्गराज इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू भृङ्गराजाय नमः कृष्ण (कालो)।

१६. मृगमावाहयामि–

ॐ मृगोन भीमः कुचरो गिरिष्ठाः परावतऽआजगन्था परस्याः। सृकꣳ सꣳ शाय पविमिन्द्रतिग्मं ब्विशत्रूँ ताड्ढि ब्विमृधोनुदस्व॥

ॐ भूर्भुवः स्वः मृग इहागच्छ इहतिष्ठ मम पूजां गृहाण ...... ॐ भू मृगाय नमः पीत (पहेंलो)।

१७. पितृनावाहयामि—

पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन्पितरो मीमदन्तपितरो तीतृपन्त पितरः पितरः शुन्धध्वम्॥

ॐ भूर्भुवः स्वः पितर इहागच्छत इहतिष्ठत मम पूजां गृहाण .... ॐ भू पितृभ्यो नमः रक्त (रातो)।

१८. दौवारिकमावाहयामि—

ॐ द्रविणोदाः पिपीषति जुहोत प्रचतिष्ठत। नेष्ट्र दृतुभिरिष्यत॥

ॐ भूर्भुवः स्वः दौवारिक इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू दौवारिकाय नमः रक्त (रातो)।

१९. सुग्रीवमावाहयामि—

ॐ नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्राऽउपश्रिताः। तेषाꣳ सहस्रयोजनेवधन्वानितन्मसि॥

ॐ भूर्भुवः स्वः सुग्रीव इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू सुग्रीवाय नमः शुक्ल (सेतो)।

२०. पुष्पदन्तमावाहयामि–

ॐ नमोगणेभ्यो गणपतिभ्यश्चवो नमो नमो व्वातेभ्योव्वतपतिभ्यश्चवो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमो नमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्चवो नमः ॥

ॐ भूर्भुवः स्वः पुष्पदन्त इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू पुष्पदन्ताय नमः रक्त (रातो)।

२१. व्वरुणमावाहयामि–

ॐ इमम्मे व्वरुणश्रुधी हव मद्या च मृडय । वामवस्युराचके।

ॐ भूर्भुवः स्वः वरुण इहागच्छ इहतिष्ठ मम पूजां गृहाण ......ॐ भू वरुणाय नमः शुक्ल (सेतो)।

२२. असुरमावाहयामि–

ॐ ये रूपाणि प्रमितमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो येभरन्त्ग्निष्ट्याँल्लोकात्व्रणुदात्त्यस्मात्॥

ॐ भूर्भुवः स्वः असुर इहागच्छ इहतिष्ठ मम पूजां गृहाण .....ॐ भू असुराय नमः पीत (पहेंलो)।

२३. शेषमावाहयामि–

ॐ याऽइषवो यातुधानानां ये वा व्वनस्पतीरनु। येवा वटेषु शेरते तेभ्यः सर्प्पेभ्यो नमः।

ॐ भूर्भुवः स्वः शेष इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ शेषाय नमः कृष्ण (कालो)।

२४. पापमावाहयामि–

ॐ एतत्ते रुद्रा व्वसन्तेन परो मूजवतो तीहि। अवततधन्वा पिनाका वसः कृत्ति वासाऽअहिꣳ सन्नः शिवोतीहि॥

ॐ भूर्भुवः स्वः पाप इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू पापाय नमः पीत (पहेंलो)।

२५. रोगमावाहयामि–

ॐ द्रापेऽअन्धसस्पते दरिद्र नील लोहित। आसाम्प्रजानाम्मेषाम्पशूनाम्माभेर्मारोङ् मोचनः किञ्चनाममत्॥

ॐ भूर्भुवः स्वः रोग इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू रोगाय नमः रक्त (रातो)।

२६. अहिर्बुध्न्यमावाहयामि–

ॐ नमोस्तु सर्प्पेभ्यो ये केच पृथिवीमनु ।
येऽअन्तरिक्षे येदिवि तेभ्यः सर्प्पेभ्यो नमः ॥

ॐ भूर्भुवः स्वः अहिर्बुध्न्य इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ अहिर्बुध्न्याय नमः रक्त (रातो)।

२७. मुख्यमावाहयामि–

ॐ अवतत्वधनुष्ट्वᳬ सहस्राक्ष शतेषुधे ।
निशीर्यशल्यानाम्मुखा शिवोनः सुममना भव।

ॐ भूर्भुवः स्वः मुख्य इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू मुख्याय नमः रक्त (रातो)।

२८. भल्लाटमावाहयामि–

ॐ इमारुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः। यथाशमसद्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्ननातुरम्।

ॐ भूर्भुवः स्वः भल्लाट इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू भल्लाटाय नमः कृष्ण (कालो)।

२९. सोमायमावाहयामि–

ॐ सोमᳬ राजानमवसेग्नि मन्वारभामहे ।
आदित्यान्विष्णुᳬ सूर्य्यं ब्रह्माणं च बृहस्पतिᳬ स्वाहा ॥

ॐ भूर्भुवः स्वः सोम इहागच्छ इहतिष्ठ मम पूजां गृहाण ...... ॐ भू सोमाय नमः कृष्ण (कालो)।

३०. सर्प्पान्मावाहयामि—

ॐ नमोस्तु सर्पेभ्यो ये केच पृथिवीमनु। येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः॥

ॐ भूर्भुवः स्वःसर्प्प इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू सर्प्पेभ्यो नमः कृष्ण (कालो)।

३१. अदितिमावाहयामि—

ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपित र पुत्रः। विश्वे देवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्जनित्वम्॥

ॐ भूर्भुवः स्वः अदिते इहागच्छ इहतिष्ठ मम पूजां गृहाण ......ॐ भू अदितये नमः पीत (पहेंलो)।

३२. दितिमावाहयामि—

ॐ इडऽएह्यदितऽएहि काम्याऽएत॥ मयिवः कामधरणं भूयात्॥

ॐ भूर्भुवः स्वः दिते इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू दितये नमः पीत (पहेंलो)।

३३. आपः आवाहयामि—

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेननो घृतप्वः पुनन्तु ॥ विश्वꣳ हिरिप्प्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूतऽएमि ॥

ॐ भूर्भुवः स्वः आपः इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू अद्भ्यो नमः शुक्ल (सेतो)।

३४. सावित्रं मावाहयामि—

ॐ. उपयामगृहीतोसि सावित्रोसि चनोधाश्चनोधाऽ असि चनो मयिधेहि ॥ जिन्वयज्ञं जिन्व यज्ञपतिम्भगाय देवायत्वा सावित्रे ॥

ॐ भूर्भुवः स्वः सावित्रे इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू सावित्राय नमः शुक्ल (सेतो)।

३५. जयन्तं मावाहयामि—

ॐ मर्म्माणिते व्वर्म्मणा च्छादयामि सोमस्त्वा राजा मृतेनानु वस्ताम्। उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तन्त्वानु देवामदन्तु ॥

ॐ भूर्भुवः स्वः जयन्त इहागच्छ इहतिष्ठ मम पूजां गृहाण ....जयन्ताय नमः शुक्ल (सेतो)।

३६. रुद्रमावाहयामि–

ॐ नमस्ते रुद्रमन्यवऽ उतोतऽइषवे नमः ॥ बाहुभ्यामुतते नमः ॥

ॐ भूर्भुवः स्वः रुद्र इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू रुद्राय नमः रक्त (रातो)।

३७. अर्य्यमाणमावाहयामि–

ॐ यदद्य सूरऽउदितेनागा मित्रोऽअर्य्यमा ॥ सुवाति सविता भगः ॥

ॐ भूर्भुवः स्वः अर्यमन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू अर्य्यमणे नमः कृष्ण (कालो)।

३८. सावितारमावाहयामि–

ॐ व्विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रन्तन्नऽआसुव ॥

ॐ भूर्भुवः स्वः सवितारं इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू सविताराय नमः रक्त (रातो)।

३९. विवस्वतमावाहयामि–

ॐ विवस्वन्नादित्यैषते सोम पीथस्तास्मिन्मत्स्व श्रदस्मै नरोव्वचसे दधातन यदाशीर्दा दम्पतिव्वाममश्नुतः। पुमान्पुत्रो जायते व्विन्दते व्वस्वधा व्विश्वाहारपऽएधते गृहे॥

ॐ भूर्भुवः स्वः विवस्वन्तम् इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू विवस्वते नमः। शुक्ल (सेतो)।

४०. विवुधाधिपमावाहयामि–

ॐ सबोधि सूरि र्मधवा व्वसुपते व्वसुदावन्। युयोद्ध्यस्म द्वेष ৺सि व्विश्वकर्म्मणे स्वाहा॥

ॐ भूर्भुवः स्वः विवुधाधिप इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू विवुधाधिपाय नमः। रक्त (रातो)।

४१. मित्रमावाहयामि–

ॐ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्योरूपं कृणुते द्योरुपस्थे। अनन्तमन्न्यद्रुशदस्य पाजः कृष्णमन्न्यद्धरितः सम्भरन्ति॥

ॐ भूर्भुवः स्वः मित्र इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू मित्राय नमः श्वेत (सेतो)।

४२. राजयक्ष्माणमावाहयामि–

ॐ अभिगोत्राणि सहसा गाहमानो दयो व्वीर : शतमन्न्युरिन्द्रः। दुश्च्यवनः पृतनाषाढ युद्ध्योस्माक६ सेनाऽअवतुप्प्रयुत्सु॥

ॐ भूर्भुवः स्वः राजयक्ष्मन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू राजयक्ष्मणे नमः रक्त (रातो)।

४३. पृथिवीधरमावाहयामि–

ॐ स्योनापृथ्वीनो भवान्नृक्षरा निवेशनि । यच्छानः शर्म्म सप्प्रथाः ॥

ॐ भूर्भुवः स्वः पृथ्वीधर इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू पृथ्वीधराय नमः रक्त (रातो)।

४४. आपवत्समावाहयामि–

ॐ आते ब्वत्सो मनो यमत्परमाच्चित्सधस्थात् ॥ अग्नेत्वां कामया गिरा ॥

ॐ भूर्भुवः स्वः आपवत्स इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू आपवत्साय नमः । श्वेत (सेतो)।

४५. ब्रह्मन् आवाहयामि–

मध्ये– ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विशीमतः सुरुचोब्वेन आवः । सबुध्न्याऽउपमाऽअस्य ब्विष्ठाः सतश्च योनिमसतश्च ब्विवः ॥

ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू ब्रह्मणे नमः।

वृषवास्तू पूजयेत् (वृषवास्तूको पूजागर्ने)–

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः। यत्वे महे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे। ॐ भूर्भुवः स्वः वास्तोस्पतये नमः॥

वास्तुको सुवर्ण प्रतिमालाई अग्निमा सेकाउने र पञ्चगव्य, शुद्ध जलले पखालि स्थापना गर्न प्राण प्रतिष्ठा गर्न सङ्कल्प गर्ने–

हरिः ॐ तत्सत् पूर्व सङ्कल्प सिद्धिरस्तु अद्येह देशकालौ सङ्कीर्त्य अमुकगोत्रः अमुकशर्माहं अस्यां वास्तुमूर्तौ अवघातादिदोषपरिहारार्थं अग्न्युत्तारणं देवतासान्निध्यार्थं च प्राणप्रतिष्ठां करिष्ये॥

मूर्तिलाई आसनमा राखेर घिउले पखाल्ने त्यसमाथि दूध धारा र जल धारा गर्ने मन्त्र–

ॐ समुद्रस्यत्वा ववकयाग्ने परव्ययामसि। पावकोऽअस्मभ्यꣳ शिवोभव॥ ॐ उपज्मन्नुपवेतसे वतरनदीष्वा । अग्ने पित्तमपामसि

मण्डूकिताभिरागहिसे मन्नो यज्ञम्पावकवर्ण्णः शिवङ्कृधि ॥ ॐ अपामिदन्न्ययनः समुद्रस्य निवेशनम् । अन्न्यां स्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मब्भ्यः शिवोभव ॥ ॐ अग्नेपावक रोचिपा मन्द्रया देव जिह्वया । आदेवान्वक्षि यक्षि च ॥ ॐ सनः पावक दीदिवोग्ने देवाँ२॥ऽइहावह । उपयज्ञः हविश्चनः ॥ ॐ पावकया यश्चितयन्त्या कृपाक्षामन्न रुचऽउषसोनभानुना । तूर्व्वन्नया मन्नेतशस्य नूरणऽआयो घृणेन ततृषणोअजरः ॥ ॐ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्च्चिषे । अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्पभ्यः शिवोभव ॥ ॐ नृषदेव्वेड प्सुषदे व्वेड्बर्हिषदे व्वेड्वनप्सदे व्वेड्स्वर्व्विदेव्वेट् ॥ ॐ ये देवा देवानां यज्ञिया यज्ञियाना ᳪ संवत्सरीणमुपभागमासते । अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयं पिबन्तु मधुनोघृतस्य ॥ ॐ ये देवा देवेष्वधिदवत्व मायन्न्ये ब्रह्मणः पुरऽएतारोऽअस्य । येभ्योनऽऋते पवते धाम किञ्चनते दिवो न पृथिव्व्याऽअधिस्नुषु ॥ ॐ प्राणदाऽअपानदा व्व्यानदा व्वर्चोदा व्वरिवोदाः । अन्न्यांस्तेऽअस्मत्तपन्तु हेतयः । पावकोऽअस्मभ्यः शिवाभव ॥

उक्त प्रतिमालाई कुशको टुक्रा सहित हातले छोएर यो बीजमन्त्र पढ्ने–

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हं सः सोऽहं अस्य वास्तेदेवस्य प्राणा इहप्राणाः । पुनः ॐ आँ ह्रीं सोऽहं अस्य वास्तेदेवस्य नीव इह स्थितः । पुनः ॐ आँ ह्रीं अस्य वास्तेदेवस्य वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वा घ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ भनी प्राणप्रतिष्ठा गर्ने ॥

गृहको मण्डप (चौका) वाहिर चरक्यं आदि देवताको स्थापना गर्ने–

इशानकोणे (ईशान कोणमा चरकीको ध्वासे सामाग्रीले पूजागर्ने मन्त्र)–

ॐ ईशावास्यमिदꣳ सर्वं यत्किञ्च जंगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद्धनम् ॥

ॐ भूर्भुवः स्वः चरकि इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू चरक्यै नमः ।

आग्नेयकोणे (आग्नेय कोणमा विदारीको रातो सामाग्रीले पूजागर्ने मन्त्र)–

ॐ अक्षराजायकितवं कृताया दिनव दर्शं त्रेतायै कल्पिनन्द्वापरायाधि कल्पिन मास्कन्दाय

सभास्थाणुं मृत्यवे गोव्यच्छ मंतकाय गोघातं क्षुधे योगां विकृन्तं तं भिक्षमाणऽउपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने श्रृलगम् ॥

ॐ भूर्भुवः स्वः विदारिके इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू विदार्य्यै नमः।

नैर्ऋत्यकोणे (नैर्ऋत्य कोणमा पूतनालाई पहेलो सामग्रीले पूजागर्ने मन्त्र)–

ॐ नमः स्रुत्यायच पथ्यायच नमः काट्यायच नीप्यायच नमः कूल्यायच सरस्यायन नमो नादेयायच वैशन्तायच ॥

ॐ भूर्भुवः स्वः पुतने इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू पुतनायै नमः।

वायव्यकोणे (वायव्य कोणमा पांपराक्षसीको कालो सामाग्रीले पूजागर्ने मन्त्र)–

ॐ यक्ष्यास्ते घोरऽआसं जुहोम्येषाम्वन्धानामव सर्जनाय। यांत्वा जनोभूमि रिति प्रमंदते निर्ऋतिं त्वाहं परिवेद विश्वतः ॥

ॐ भूर्भुवः स्वः पापराक्षसी इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू पापराक्षस्यै नमः।

पूर्वादिक्रमले पूजागर्ने–

पूर्वे (पूर्वमा स्कन्दको रातो सामाग्रीले पूजागर्ने मन्त्र)–

ॐ यदक्रन्दः प्रथमं जायमानऽउद्यन्त्समुद्रादुतवा पुरीषत् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महियातन्तेऽअर्वन् ॥

ॐ स्कन्द इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू स्कन्दाय नमः ।

दक्षिणे (दक्षिणमा अर्य्यमन्लाई कालो सामग्रीले पूजागर्ने मन्त्र)–

ॐ यदद्यसूरऽउदिते नागामित्रोऽअर्य्यमा । सुवाति सविता भगत्रा ॥

ॐ भूर्भुवः स्वः अर्य्यमन् इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू अर्य्यम्णे नमः ।

पश्चिमे –पश्चिममा जृम्भकलाई रातो सामाग्रीले पूजागर्ने)–

ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वा। क्रन्दते स्वाहा वक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गंधाय स्वाहा घ्राताय स्वाहा निविष्ठाय स्वाहोपविष्याय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजत

स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय स्वाहा सᳩ हानाय स्वाहोपस्थिताय स्वाहा यनाय स्वाहा प्रायणाय स्वाहा॥

ॐजृम्भक इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू जृम्भकाय नमः।

उत्तरे (उत्तरमा पिलिपिच्छको पहेंलो सामाग्रीले पूजागर्ने मन्त्र)–

ॐ कास्विदासीत्पूर्व. चित्तिः कि ᳪ स्विदासीद्बृहद्वयः । कास्विदासीत्पिलिप्पिला कास्विदासीत्पिशंगिला॥

ॐ भूर्भुवः स्वः पिलिपिच्छ इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू पिलिपिच्छाय नमः।

फेरि पूर्वादि क्रमले इन्द्रादि दशदिक्पालको आवाहन गरी पूजागर्ने–

पूर्वमा इन्द्रको–

ॐ त्रातारमिन्द्रमवितारमिन्द्र ᳩ हवे हवे सुहवᳩ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रᳩ स्वस्तिनो मघवाधात्विन्द्रः॥

ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू इन्द्राय नमः।

आग्नेयमा अग्निको—

ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विश्वद्वेषाꣳसि प्प्रमुमुग्ध्यस्मत्।

ॐ भूर्भुवः स्वः अग्नि इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू अग्नये नमः।

दक्षिणमा यमको—

ॐ यमायत्वा गिरस्वते पितृमते स्वाहा स्वाहा घर्माय स्वाहा घर्मः पित्रे॥

ॐ भूर्भुवः स्वः यम इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू यमाय नमः।

नैर्ऋत्यमा निर्ऋतिको—

ॐ अशुन्वन्तम यजमान मिच्छस्तेन स्येत्या मन्विहितस्करस्य। अन्यमस्मदिच्छ सातऽइत्या नमो देविनिर्ऋते तुभ्यमस्तु॥

ॐ भूर्भुवः स्वः निर्ऋतये इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू नैर्ऋत्याय नमः।

पश्चिममा वरुणको—

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणे हवोध्युरुशꣳ समानऽआयुः प्रमोषीः॥

ॐ भूर्भुवः स्वः वरुण इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू वरुणाय नमः ।

वायव्यमा वायुको–

ॐ आनो नियुद्धिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् । व्वायोऽअस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदानः ॥

ॐ भूर्भुवः स्वः वायु इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू वायवे नमः ।

उत्तरमा कुबेरको–

ॐ वयꣳ सोमव्रते तवमनस्तनूषु विभ्रतः । प्रजावन्तः सचेमहि ॥

ॐ भूर्भुवः स्वः कुवेर इहागच्छ इहतिष्ठ मम पूजां गृहाण ....ॐ भू कुवेराय नमः ।

ईशानमा ईशानको–

ॐ तमीशानं जगतस्तस्थुष स्पतिन्धियं जिन्वमवसेहूमहेव्वयम् । पूषानो यथा वेद सामसद्वृधे रक्षितापायुरदब्धः स्वस्तये ॥

ॐ भूर्भुवः स्वः इशान इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू इशानाय नमः ।

ईशान र पूर्वको बीचमा ब्रह्माको–

ॐ अस्मे रुद्रामेहना पर्ब्वता सोवृत्रहत्ये भरहूतौ सजोषाः । यः शᳬ सते स्तुवते धायि पज्ज्रऽइन्द्र ज्येष्ठाऽअस्माँ२॥ऽ अवन्तु देवाः ॥

ॐ भूर्भुवः स्वः ब्रह्मन् इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू ब्रह्मणे नमः ।

निर्ऋति र पश्चिमको बीचमा अनन्तको–

ॐ स्योनापपृथिवी नोभवा न्नृक्षरानिवेशनि । यच्छानः शर्म्मसप्प्रथाः ॥

ॐ भूर्भुवः स्वः अनन्त इहागच्छ इहतिष्ठ मम पूजां गृहाण .... ॐ भू अनन्ताय नमः ।

(कसैको मतमा अष्ट दिक्पालको पूजागर्नु पर्दछ भन्ने छ)

शिख्यादिवास्तुमण्डलस्थदेवताको पूजागर्ने–

ॐ मनोजूति र्जुषता माज्यस्य बृहस्पतिर्य्यज्ञमिमं तनोत्वरिष्टं यज्ञᳬ समिमन्दधातु । विश्वेदेवासऽइह मादयन्तामौँ२॥ प्रतिष्ठ। शिख्यादिवास्तुमण्डलस्थदेवताः सुप्रतिष्ठिता वरदा भवन्तु ॥ शिख्यादिवास्तुमण्डलस्थदेवताभ्यो नमः ।

मण्डलको इशान वा उत्तरमा वीच ताम्रकलश सर्वलक्षणले युक्त भएको कलश स्थापना गरी कलश पूजाविधि अनुसार पूजागर्ने र त्यसमाथि सुवर्णमयी कृकलाराकारस्वरूपको वास्तुपूरुष प्रतिमालाई पहिले बताइए अनुसार अग्निमा सेकाइ प्राणप्रतिष्ठा गरिएकोलाई नजिक राखेर पूजागर्ने।

आवाहनम् (आवाहन गर्ने मन्त्र)–

समस्तप्रत्यूहसमुच्चयस्य विनाशकाः श्रीप्रदवास्तुदेवाः । ऋावाहनं तो वितनोमि भक्त्या शिरव्यादिका भव्यकरा भवन्तु ॥

आसनम् (कुशको आसन चढाउने मन्त्र)–

चित्रप्रभाभासुरमच्छशोभं मयार्पितं शोभितमासनं च ।शिख्यादिका भव्यकरा भजन्तु भवन्तु मेऽभीष्टकराः सहाङ्गैः ॥

पाद्यम् (जल चढाउने मन्त्र)–

कस्तुरिकासु भिचन्दनयुक्तमेलाचम्पालवङ्गघनसार सुवासितं च। पाद्यं ददामि जगदेकनिवास वास्तुदेवाः सदा सुखकराः प्रतिमानयन्तु ॥

अर्घ्यम् (अर्घजल चढाउने मन्त्र)–

सौजन्यसौख्यजननीजननीजनानां येषां कृपैव वसुधा वसुधारिणी मे ।ते सर्वदेवगुण पूरितवास्तुदेवा अर्घं सुखेन विमलं मम धारयन्तु ॥

आचमनीयम् (आचमनी जल चढाउने मन्त्र)–

कङ्कोलपत्रहरिचन्दनपुष्पयुक्त मेलालवङ्गलंवलीघनसारसारम् । दत्तं सदैव हृदये कुरुणाशयेऽस्मिन् देवा भजन्तु शुभमाचनीयमम्भः ॥

स्नानम् (स्नान गराउने मन्त्र)–

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।

पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।

पञ्चामृत स्नानम् (पञ्चमृतले स्नान गर्ने मन्त्र)–

विमलगाङ्गजलेन युतं पयो घृतासितादधिसर्पिरूपान्वितम् । प्रियतरं भवतां परिगृह्णमत यदि कृपा भवतां मयि सेवके ॥

शुद्धोदकस्नानम् (शुद्धजल चढाउने मन्त्र)–

जले समादाय विचित्र पुष्पाण्यच्छानि नव्यानि निपातितानि ।स्नानं विधेयं विवुधाः समन्तादागत्य युष्माभिरिहाङ्गणे मे।

वस्त्रम् (वस्त्र चढाउने मन्त्र)–

अनर्घ्यरत्नैरतिभासितानि चेतोहाण्यद्भूतचिन्तितानि । शुभानि वस्त्राणि निवेदितानि गृह्णन्तु हार्देन च वास्तुदेवाः ॥

यज्ञोपवीतम् (जनै चढाउने मन्त्र)—

कोशेयसूत्रविहितं विमलं सुचारुवेदोक्तरीतिविहितं परिपावनं च । साङ्गा निवेदितमिदं लघुवास्तुदेवा यज्ञोपवीत मुररी क्रियतां प्रसन्नाः ॥

उपवस्त्रम् (उपर्ना वस्त्र चढाउने मन्त्र)—

त्रिविधतापविनाशविचक्षणाः परमभक्तियुतेन निवेदितम् । सुरनुता उपवस्तमिदं नवं सुरभितं परिगृह्णत मेऽधुना ॥

गन्धम् (चन्दन चढाउने मन्त्र)—

शख्यादयो मलयजातसुगन्धराशिं सप्रेमगृह्णत सुशीतलम्छशोभम् । सन्तापविस्ततिहरं परमं पवित्रं द्रागर्पितं मम मनोरथपूरकाः स्युः ॥

अक्षतान् (अक्षता चढाउने मन्त्र)—

शिख्यादयः केसरकुंकुमात्तान् भक्त्या मया स्नेहसमर्पितांश्च । गृह्णन्तु देवा द्रुतमक्षतान्मे सर्वान्तर ायान् विनिवर्तयध्वम् ॥

पुष्पम् (फूल चढाउने मन्त्र)—

बहुविधं परितो हि समाहृतं समुचितं मकरन्दसमन्वितम् । विकसितं कुसुमं विनिवेदितं कुरुत मे सफलं नयानञ्चलैः ॥

रक्तसूत्रम् (रातो धागो चढाउने मन्त्र)–

सौभाग्यसौन्दर्यविवर्द्धनानि शोणश्रियाऽऽनन्दविवर्धनानि । श्रीरक्तचूर्णानि मयाऽर्पितानि शिख्यादयोगृह्णत वास्तुदेवाः ॥

धूपम् (धूप डोलाउने मन्त्र)–

लवङ्गपाटीरसुगन्धपूर्णं नरासुराणामपि सौख्यदं च । लोकत्रये गन्धमयं मनोज्ञं गृह्णन्तु धूपं मम वास्तुदेवाः ॥

दीपम् (बत्ति देखाउने मन्त्र)–

सद्वर्तिको घोरतमोपहन्ता दीपो मया सत्वरमर्पितो वः । प्रज्वालितो वह्निशिखासमेतः शिख्यादयो वेदविधानयुक्तः ॥

नैवेद्यम् (नैवेद्य चढाउने मन्त्र)–

सिद्धान्तकर्पूरविराजमानं सौरभ्यसान्द्रेण शुशोभमानम् । नैवेद्यमेतस्सरसं पवित्रं स्वकृत्य मामत्र कृतार्थयन्तु ॥

ताम्बूलम् (पान मसला चढाउने मन्त्र)–

शिख्यादिकाः खलु समेत्य गृहं मदीयं भक्त्यार्पितं परमगन्धयुतं सुरम्यम् । एलालवङ्गबहुलं क्रमुकादियुक्तं ताम्बूलकं भजत मण्डपवास्तुदेवाः ॥

दक्षिणा द्रव्यम् (दक्षिणा चढाउने मन्त्र)–

दैवासुरैर्नित्यमशेषकाले प्रगीयगानाः प्रभवः पुराणाः । गृह्णन्तु सद्यः खलु दक्षिणां मे ध्यानेन भक्ते मयि वर्तितव्यम् ॥

आर्तिक्यम् (आरति गर्ने मन्त्र)–

नीराजना सौख्यमयी सदैव गाढान्धकारानपि दूरकर्त्री । अशेषपापैः परिपूरितस्य शुद्धिं करोति प्रियमानवस्य ॥

प्रदक्षिणाम् (जलले प्रदक्षिणा गर्ने मन्त्र)–

प्रदक्षिणाः सन्ति प्रदक्षिणास्तथा पदे–पदे दुखविनाशिका अपि। जन्मान्तरस्यापि विनाशकारिकाः पापस्य याश्चित्तविवर्धितस्य ॥

पुष्पाञ्जलिम् (फूल अक्षता लिने मन्त्र)–

शिख्यादिका मे खलु वास्तुदेवा गृह्णन्तु पुष्पांजलिमेव शिघ्रम्। पीडाहरा भत्यकरा विशाला भवन्तु भूपालनतत्पराश्च ॥

प्रार्थना गर्ने मन्त्र–

यथा मेरुगिरेः शृङ्गं देवानामालयः सदा ।
तथा ब्रह्मादिदेवानां गृहे मम स्थिरो भव ॥

जानामि नोऽर्चनविधिं परमं क्षमध्वं लोकार्तिपुञ्जमतुलं क्षंपयन्तु नित्यम्। शिख्यादिका सुविमलाः सुखमाकिरन्तु कुर्वन्तु दूरमनिशं दुरितान् समन्तात्॥

धूपदीप नैवद्य दक्षिणा पछि नरिवल राखेर माथि बाट कपडाले छोपिदिने र लाजा र अविर हालिदिने।

इति वास्तु पूजा॥

चतुःषष्ठी पछि ग्रह हवन

(कुशकण्डिका अनुसारको विधि अनुसार अग्निस्थापना पूजाआजा सबै गरीएकै छ) चतुःस्वस्ति पछि ग्रह आदिको हवन गर्ने ग्रह आदिको सुरोले घिउ हवन गर्ने मन्त्र–

ॐ प्रजापतये स्वाहा इदं प्रजापतये नमम इति मनसा॥

ॐ इन्द्राय स्वाहा इदमिन्द्राय नमम। इत्याधारः॥

ॐ अग्नये स्वाहा इदमग्नये नमम॥

ॐ सोमाय स्वाहा इदं सोमाय नमम। इत्याज्यभागौ॥

अब यजमानले जल अक्षता लिएर हवनीयद्रव्याणिले जहाँ जहाँ यक्ष्यमाण देवताहरू छन् त्यहाँ त्यहाँ मया परित्यक्तं नमम यथा दैवतमस्तु॥ भनी छाडिदिने॥

